श्री स्कान्दे महापुराणे प्रथमे माहेश्वरखंडे । १
कौमारिका खण्ड आरम्भः ।२

अध्याय : १ Chapter-1

ॐ नमो बृहस्पतये ।।३ नमस्तस्मै ब्रह्मणे ।।४
विष्णवे नमः ।।५ श्री मुनय ऊचुः ।।६

दक्षिणार्णवतीरेषु यानि तीर्थानि पंच च ।।
तानि७ ब्रूहि८ विशालाक्ष वर्णयंत्यपि तानि ब च ।। १

सर्व तीर्थ फलं येषु नारदाद्या वदंति च ।।
तेषां चरित माहात्म्यं श्रोतुमिच्छामहे वयम् ।। २

उग्रश्रवा उवाच ।।
शृणुध्वमत्यद्भुत पुण्य सत्कथं कुमारनाथस्य महाप्रभावम् ।।
द्वैपायनो मन्मम चाह पूर्व हर्षाबुरोमोद्गम चर्चितांगः ।। ३

कुमारगीता९ गाथात्र श्रूयतां मुनि सत्तमाः ।।
या सर्वदेवैः मुनिभिः पितृभिश्च प्रपूजिता ।। ४

मध्याचारे स्तंभतीर्थे यो निष्वेवेत मानव : ।।
नियतं तस्य वासः स्याद्ब्रह्मलोके यथा मम ।। ५

ब्रह्मलोकाद्विष्णु लोकस्तस्मादपि शिवस्य च ।।
पुत्रप्रियत्वात्तस्यापि गुहलोको१० महत्तमः ।। ६

---

१. २. अ. ब. हस्तप्रतिषु इत्ययं पाठः नास्ति ।।
३. ४. ५. अ. प्रतौ इत्ययं पाठः नास्ति ।।
ब. श्री गणेशाय नमः ।। श्री गुरुभ्यो नमः ।।
श्री सरस्वत्यै नमः ।।
६ ब श्री मुनयऊचुः । ७ ब. ता. ब्रूहि ।
९ ब कुमारनाथ गीता
१० अ गुहलो ।

अत्राश्चर्यकथा या च फाल्गुनस्य पुरेरिता[१] ।।
नारदेन मुनिश्रेष्ठास्तां वो वक्ष्यामि विस्तरात ।। ७

पुरा निमित्ते कस्मिंश्चित्किरीटी मणिकूटित :[२] ।।
समुद्रे दक्षिणेऽभ्यागात्स्त्रातुं तीर्थानि पंच च[३] ।। ८

वर्जयंति सदा यानि भयातीर्थानि तापसा : ।।
कुमारेशस्य पूर्वं च तीर्थमस्ति मुने:[४] प्रियम् ।। ९

स्तंभेशस्य द्वितीयं च सौभद्रस्य मुनेः प्रियम् ।।
बर्करेश्वरमन्यच्च पौलोमी प्रियमुत्तमम् ।। १०

चतुर्थं च महाकालं करंधमनृपप्रियम् ।।
भरद्वाजस्य तीर्थं च सिद्धेशाख्यं हि पंचमम् ।। ११

एतानि पंच तीर्थानि ददर्श[५] कुरुपुंगवः[६] ।।
तपस्विभिः वर्जितानि महापुण्यानि तानि च ।। १२

दृष्ट्वा पार्थो[७] नारदीयान पृच्छत महामुनीन् ।।
तीर्थानीमानि रम्याणि प्रभावाद्भूतवंति च ।। १३

---

१ अ ता:

२ अ पूर्तिवः ब पूरतः

३ अ. ब. सः

४ अ\ मुने

५ ब दर्शदि

६ ब गुरुपुंगवः

७ अ. ब. पार्श्रे

किमर्थं क्रूत वर्ज्यंति सदैव ब्रह्मवादिभिः ।।
तापसा[१] ऊचुः[२] ।। ग्राहाः पंच वसंत्येषु हरंति च तपोधनान् ।। १४

अत एतानि वर्ज्यंते तीर्थानि कुरुनंदन ।।
इति श्रुत्वा महाबाहुर्गमनाय मनो दधे ।। १५

ततस्तं तापसाः प्रोचुर्गंतुं नार्हसि फाल्गुन ।।
बहवो भक्षिता ग्राहै राजानो मुनयस्तथा ।। १६

तत्त्वं द्वादश वर्षाणि तीर्थानाम् बुदिष्वपि ।।
स्नातः किमेतैस्तीर्थैस्ते मा पतंगव्रतो भव ।। १७

अर्जुन उवाच ।।[३]

यदुउक्तम करुणासारैः सारं किं तदिहोच्यताम् ।।
धमार्थी मनुजो यश्च न स वार्यो[४] महात्मभिः ।। १८

धर्मकामं हि मनुजं यो वारयति मंदधीः ।।
तदाश्रितस्य जगतो निःश्वासैर्भस्मसाद्भवेत ।। १९

यजुजीवितं चाचिरांशु[५] समानक्षण भंगुरम् ।।
तन्नूर्चर्धमं कृते याति यातु दोषोऽस्मि को ननु ।। २०

---

१ ब तापसाः

२ अ उवाचुः ब ऊचुः

३ ब ऊ० ।।

४ ब सवार्थी

५ ब चाचिविद्युतूरांशु

(Folio No. 2 is missing from M.S.A. so slokas No.15 to 35 are missing)

जीवितं च धनं दाराः पुत्राः क्षेत्रगृहाणि च ॥
यान्ति येषां धर्मकृते त एव भुवि मानवाः[1] ॥ २१

तापसा ऊचुः ॥[2]
एवं ते ब्रुवतः पार्थ दीर्घमायुः प्रवर्धताम् ॥
सदा धर्मे रतिर्भूयाधा हि स्वं कुरु वांछितम् ॥ २२

एवमुक्तः प्रणम्यैतानाशीर्भिर्भि संस्तुतः ॥
जगाम तानि तीर्थानि द्रष्टुं भरतसत्तमः ॥ २३

ततः सौभद्रमासाद्य महर्षेस्तीर्थमुत्तमम् ॥
विगाह्य तरसा वीरः स्नानं[3] चक्रे परंतपः ॥ २४

अथ तं पुरुषव्याघ्रमंतर्जलचरी महान् ॥
निजग्राह जले ग्राहः कुंतीपुत्रं धनंजयम् ॥ २५

तमादायैव कौंतेयो विस्फुरंतं जलेचरम् ॥
उदतिष्ठन्महाबाहुर्बलेन बलिनां वरः ॥ २६

उद्धृतश्चैव[4] तु ग्राहः[5] सोऽर्जुनेन यशस्विना ॥
बभूव नारी कल्याणी[6] सर्वाभरणभूषिता ॥ २७

---

१ ब मानजः
२ ब ऊर्चुः
३ अ। स्वानं
४ ५ ब उद्धृतस्तु तथा ग्राहः
६ ब कल्याणि

दीप्यमान शिखा विप्रा दिव्यरूपा मनोरमा ।।
तदद्भुतं महद्दृष्ट्वा कुंतीपुत्रो धनंजय : ।। २८

तां स्त्रियं परमप्रीतः इदम् वचनम् ब्रवीत् ।।
का वै त्वमसि कल्याणि कुतो वा जल चारिणी ।। २९

किमर्थं च महत्पापमिदं कृतवती ह्यसि ।।
नार्युवाच ।।
अप्सरा ह्यस्मि कौंतेय देवारण्यनिवासीनी[1] ।। ३०

दृष्टवा[2] धनपतेर्नित्यं वर्चानाम महाबलः ।।
मम सख्यश्चतस्त्रोऽन्याः सर्वाः कामगमाःशुभा ।। ३१

ताभिः सार्धं प्रयातास्मि देवराज निवेशनात् ।।
ततः पश्यामहे सर्वा ब्राह्मणं चानिकेतनम्[3] ।। ३२

रूपवंतमधीयान मेकमेकांत चारिणम् ।।
तस्य वै तपसा वीर तद्वन तेजसावृतम् ।। ३३

आदित्य इव तं देशं कृत्स्नमेवान्व भासयत् ।।
तस्य दृष्ट्वा तपस्ताद्रूरूपं[4] चाद्भुत दर्शनम् ।। ३४

---

१ ब निवासिनी

२ ब द्रष्टा

३ ब नाचिकेतकं ।।

४ अ। रूपं

अवतीर्णास्मि तं देशं तपोविघ्नचिकीर्षया ।।
अहं च सौरभेयी च सामेयी बुद्बुदा लता ।। ३५

यौगपद्येन तं विप्रमभ्यगच्छाम् भारत ।।
गायंत्यो ललमानाश्च लोभयंत्यश्च तं द्विजम् ।। ३६

स च नास्मासु कृत्वान्मनो वीरः कथंचन ।।
नाकंपत महातेजाः[1] स्थितस्तपसि निर्मले ।। ३७

सोऽशपत्कुपितोऽस्मासु ब्राह्मणः क्षत्रियर्षभ ।।
ग्राहभूता जले यूयं भविष्यथ शतं समाः ।। ३८

ततो वयं प्रव्यथिताः सर्वा भरतसत्तम[2] ।।
आयाताः शरणं विप्रं[3] तपोधनम् कल्मपम् ।। ३९

रूपेण वयसा चैव[4] कंदर्पेण च दर्पिताः ।।
अयुक्तं कृतवत्यः स्म क्षंतुमर्हसि नो द्विज ।। ४०

एष एव वधोऽस्माकं स पर्याप्तस्तपोधन ।।
यद्वयं संसितात्मानं प्रलोब्धुं त्वामुपागताः ।। ४१

---

१ अ महातजाः
२ ब ~~भरत~~ भरणसत्तमा
३ अ विप्रं
४ अ चेव

अवध्याश्च स्त्रियः सृष्टा मन्यंते धर्मचिंतकाः ।।
तस्माद् धर्मेण धर्मज्ञ एष वादो मनीषिणाम्[1] ।। ४२

शरणं च प्रपन्नानां शिष्टाः कुर्वंति पालनम् ।।
शरण्यम् त्वां प्रपन्नाः समस्तस्मात्त्वम् क्षंतुमर्हसि ।। ४३

एवमुक्तस्तु धर्मात्मा ब्राह्मणः शुभ कर्मकृत् ।।
प्रसादं कृत्वाऽब्रूर[2] रवि सोम सम प्रभः ।। ४४

ब्राह्मण उवाच ।।
भवतीनां चरित्रेण[3] परिमुह्यामि चेतसि ।।
अहो धाष्टर्यमहो मोहो यत्पापाय प्रवर्तनम् ।। ४५

मस्त कस्थायिनं मृत्युं यदि पश्येदयं जन :
आहारोऽपि न रोचेत[4] किमुताकार्य कारिता ।। ४६

अहो मानुष्यकं जन्म सर्वजन्मसु दुर्लभम् ।।
तृणवत्क्रियते कैश्चिद्यो यैन्मूढै दुराधरैः ।। ४७

तान्वयं समपृच्छामो यः जनैर्वः किंनिमित्ततः[5] ।।
को वा लाभो विश्वार्यैतन्मनसा सह प्रोच्यताम् ।। ४८

---

१ अ।ब मनीषिणां
२ अ कृतवानशुर
३ ब शरीरेण
४ अ रोचत
५ ब तमः ।।

न चैताः परिनिन्दामो जनिर्याभ्यः प्रवर्तते ।।
केवलं तान्विनिंदामो ये च तासु निरर्गला:[१] ।। ४९

यतः पद्मभुवा सृष्टं मिथुनं विश्ववृद्धये ।।
तत्तथा परिपालयंम्र् वै नात्र[२] दोषोऽस्ति कश्चन ।। ५०

या बांधवैः प्रदत्ता स्याद्वह्नि द्विज समागमे ।।
गार्हस्थ्य पालनम्र् धन्यम्र् तथा सार्कंहि सर्वदम् ।। ५१

यथा प्रकृति पुंयोगो यत्नेनापि[३] परस्परम् ।।
साध्यमानो गुणाय स्याद गुणायाप्य साधितः ।। ५२

एवं यत्ना साध्यमानं स्वकं गार्हस्थ्यमुत्तमम् ।।
गुणाय महते भूयाद गुणायाप्य साधितम् ।। ५३

पुरे[४] पंचमुखे द्वाःस्थ एकादश भटैर्युतः ।।
सार्कंनार्या बह्वपत्यः स कथं स्याद चेतनः ।। ५४

यच्च स्त्रिया समायोगः पंच[५] यज्ञादि कर्मभिः ।।
विश्वोपकृतये सृष्टा[६] मूढैर्हा साध्यतेऽन्यथा ।। ५५

---

१ अ निरग्रलाः ।। ब निर्गलाः ।।
२ ब नास्ति
३ ह अ यत्नेनाति
४ अ ब पुरि
५ अ। ब पंच
६ अ सृष्टौ

अहो श्रृणुध्वंश्च नो चेद्वः शुश्रूषा जायते शुभा[1] ।।
तथापि बाहुमुद्धृत्य शेखयामः श्रृणोतिकः ।। ५६

षाड्[2]धातुसारम् तद्वीर्यं समानां परिहाय च ।।
विनिक्षेपेत्कुयोनौ तु तस्येदं प्रोक्तवान्यमः ।। ५७

प्रथमं चौषाधीद्रोगृधा आत्मद्रोगृधा ततः पुनः
पितृद्रोगृधा विश्वद्रोगृधा यात्त्यंधं शाश्वतीः समाः ।। ५८

मनुष्यं पितरौ देवा मुनयो मानवास्तथा ।।
भूतानि चौपजीवर्वंति तदर्थ नियतो भवेत् ।। ५९

वचसा मनसा चैव जिह्वया करश्रोत्रकैः ।।
दांतमाहुर्हि सत्तीर्थं[3] काकतीर्थंमतः परम् ।। ६०

काकप्राये[4] नरे[5] यस्मिन्नर्मते तामसा जनाः ।।
हंसोऽयमति देवानां कोऽ[6]र्थस्तेन विचिंत्यताम् ।। ६१

एवंविधं हि विश्वस्य निर्माणं स्मरतो हृदि ।।
अपि कृते त्रिलोकयाश्रृवं कथं पापे रमेन्मनः ।। ६२

---

१ अ शुभाः
२ ब षाट्
३ ब ततीर्थं
४ अ प्राय
५ अ नरा
६ अ कथं

तदिदं चान्यमत्यर्थानां शास्त्रदृष्टं महो स्त्रिः ।।
यमलोके मया दृष्टं मुह्ये प्रत्यक्षतः कथम् ।। ६३

भवतीषु च कः कोपी[1] ये यदर्थे हि निर्मिताः ।।
ते तमर्थं प्रकुर्वंति सत्यमस्तु भमैव च[2] ।। ६४

शतं सहस्त्रं[3] विश्वं[4] च सर्वमक्षय वाचकम् ।।
परिमाणं[5] शतं त्वेवनैषदक्षय्य वाचकम् ।। ६५

यदा च वो ग्राहभूता गृह्णतीः पुरुषाञ्जले ।।
उत्कर्षति जलात्कश्चित्स्थले पुरुषसत्तमः ।। ६६

तदा[6] यूयं पुनः सर्वाः स्वरूपं प्रतिपत्स्यथ[7] ।।
अनृतं नोत्कपूर्वं मे हसतापि कदाचन ।।
कल्याणस्य सुपुत्रकस्य शुद्धिस्तद्वश हि त्र ।। ६७

नार्युवाच ।।
ततोभिवाद्य तं विप्रं कृत्वा चैव प्रदक्षिणाम् ।।
अचिंतयामापसृत्य तस्माद्देशात्सुदुःखिताः[8] ।। ६८

क्वनु नाम वयं सर्वाः कालेनाल्पेन तं नरम् ।। ६९

---

१ ब प्रोक्तो । परंतु मुद्रित पुस्तके कोपी इति स्यात्
२ अ प्रतौ च नास्ति ।
३ अ सस्त्रं
४ ब विश्वे
५ अ परिमाम
६ ब यदा
७ अ पश्यत ।।
८ अ दुखिता ~~दुःखिताः~~

समागच्छेम यौ नः स्वं स्वरूपमापदयेत्पुनः ।।
ता वयं चिंतयित्वेह मुहूर्तादिव[1] भारत ।। ७०

दृष्टवत्यो महाभागं देवर्षिमिय नारदम् ।।
सर्वा दृष्टाः स्म तं दृष्ट्वा देवर्षिममितद्युतिम् ।। ७१

अभिवाद्य च तं पार्थ स्थिताः[2] स्मो त्यथितानना: ।।
स नोऽपृच्छद्दुःख मूलम् उक्तवत्यो वयं च तम् ।। ७२

श्रुत्वा तत्र यथा[3]तत्त्वमिदं वचनमब्रवीत ।।
दक्षिणे सागरेऽनूपे पंच तीर्थानि संति वै ।। ७३

पुण्यानि रमणीयानि तानि गच्छत मा चिरम् ।।
तत्रस्थाः पुरुषव्याघ्रः पांडवो वो धनंजयः ।। ७४

मोक्षयिष्यति शुद्धात्मा दुःखादस्मान्न संशयः ।।
तस्य सर्वा[4] वयं वीर श्रुत्वा वाक्यमिहागताः ।। ७५

त्वमिदं सत्यवचनं कर्तुमर्हसि पांडव ।।
त्वद्विधानां हि साधूनां जन्म दीनोपकारकम् ।। ७६

श्रुत्वेति वचनं तस्याः सस्त्री[5] तीर्थेष्वनुक्रमात् ।।
ग्राहभूताश्चोज्जहार यथापूर्वाः स पांडवः ।। ७७

---

१ अ दिवा
२ अ स्थिता
३ अ तथा
४ अ श्रुवा
५ अ सास्नो

ततः प्रणाम्य ता वीरं प्रोच्यमाना जयाशिषाः ।।
गंतुं कृताभिलाषाश्चै प्राह पार्थो धनंजयः ।। ७८

एष मे हृदि संदेहः सुदृढः परिवर्तते ।।
कस्माद्वो नारदमुनिरनुजज्ञौ प्रवासितुम्[1] ।। ७९

सर्वः कोऽप्यति हीनोऽपि स्वपूज्यस्यार्थ साधकः ।।
स्वपूज्य तीर्थेष्वावासं प्रीकृतवान्नारदः कथम् ।। ८०

तथैव नवदुर्गासु सतीष्वति बलासु च ।।
सिद्धेशे[2] सिद्धि[3]गणश्चै चापि यौऽत्र स्थितिः कथम् ।। ८१

एकैक एषां शक्तौ हि अपि देवान्नि[4]वारितुम् ।।
तीर्थसंरोध कारिण्यः सर्वा[5]नावारयत्कथम् ।। ८२

इति चिंतयते मह्यं भूरि दौलायते मनः ।।
महन्मे कौतुकं जातं सत्यं वा वक्तुमर्हथ ।। ८३
अप्परस ऊचुः ।।

योगृयं पृच्छसि कौन्तेय पुनः पश्योत्तरां दिशम् ।। ८४

एष स्वविप्रैरभि संवृतोऽभ्यो मुनिः समायाति तथेति नारदः ।।
सर्वं हि पृष्टं तव चै स वक्ता प्रोच्यै[6]वमाकाशतलं गतास्ताः ।। ८५

इति श्री स्कंदे महापुराण एकाशीति साहस्त्र्यां संहितायां प्रथमे माहेश्वरे खण्डे कौमारिका खंडे पार्थेन पञ्चाप्सरः समुद्धरणंनाम प्रथमोऽध्यायः[7] ।। १ ।।

---

१ अ पत्री "अत्र संशय" इति स्यात् । २ अ सिद्धेश्वरः ब सिद्धेशि
३ ब सिद्ध ४ ब देवाभि ५ अ सार्व ६ ब प्राक्तौ
७ ब इति श्री स्कंद पुराणे कुमारिका खंडे प्रथमोध्यायः ।। १